॥श्रीगणेशायनमः॥अथसंन्यासप्रयोगोलिख्यते॥प्रथमंगुरुलक्षणं
निस्पृहःसर्वतःशांतआत्मविद्याविशारदः॥सर्वसंशयसंछेत्तानरलसो
गुरुरुच्यते॥१॥कर्ताअनाश्रमीचेत्करिष्यमाणपरमहंससंन्यास
कर्तुंचतुःकृच्छ्रात्मकंप्रायश्चित्तंप्रतिकृच्छ्रंप्रत्याम्नायगोनिष्क्रयद्वारा
अहमाचरिष्ये॥आश्रमीचेत्तत्सकृच्छ्रंप्रायश्चित्तंशारीरशुद्ध्यर्थंक
र्तव्यश्चेत्तदा॥संन्यासांगप्रायश्चित्तेनसहकर्तव्यं॥ततोअष्टौश्राद्धान्
वं॥नद्यादौगत्वाप्राङ्मुखोयज्ञोपवीतीयवसहितजलेन॥श्राद्धदेवतानां
१ तर्पणंकुर्यात्॥ब्रह्माणंतर्पयामि॥विष्णुंतर्प॰महेश्वरं॰देवर्षिं॰ब्रह्मर्षिं॰
क्षत्रर्षिं॰वसून्॰रुद्रांस्त॰आदित्यांस्तर्प॰सनकंत॰सनंदनं॰सनातनं॰प्र १
थिव्यादीनिपंचमहाभूतानित॰एकादशचक्षुरादीनिकरणानित॰
चतुर्विधंभूतग्रामंत॰पितरंतर्पया॰पितामहं॰प्रपितामहं॰मातरं॰पिता
महींप्रपितामहीं॰आत्मानं॰पितरं॰पितामहंतर्पयामि॥इतितर्पणविधा

स॰ क्षणः कर्तव्यः ८ इत्यष्टादश ब्राह्मणान्निमंत्र्य तेषां पादान्प्रक्षाल्य॥ यथा
पूर्वं प्राङ्मुखानुदक्संस्थानुपविश्य प्रार्थयेत्॥ सन्यासार्थमहं श्राद्धं कुर्वे ब्रूत
द्विजोत्तमाः॥ अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीं। गर्भवासभ
याद्भीतस्तथा तापत्रयादपि॥ सोहं प्रवेष्टुमिच्छामि परं पदमनामयं॥ ॐ
कुरुष्वेति द्विजैरुक्ते। कर्त्ता सर्वत्र द्विजकरेषु यवोदत्वा॥ रुग्नु दूर्वायुग्मयव
२ सहितं गृहीत्वा॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखा इदमासनं इति २
विप्रदक्षिणभागे आसनं दत्वा। एवं द्वितीये विप्रे। ततो ब्रह्माद्यष्टपार्वणार्थ
मुपविष्टेषु षोडशब्राह्मणेष्वप्येवमेवासनानि दद्यात्॥ तथा ब्रह्मविष्णु
महेश्वराः नांदीमुखाः इदमासनं॰१ देवर्षिब्रह्मर्षिक्षत्रर्षयः इदमासनं॰२ नांदी॰
वसुरुद्रादित्याः॰ नांदीमुखा इदमासनं।३ सनकसनंदनसनातनाः
नांदीमु॰ इदमासनं ४ पृथिव्यादीनि पंचमहाभूतानि चक्षुरादीनि ए
कादशकरणानि चतुर्विधो भूतग्रामः नांदीमुखा इदमासनं ५ पितृपि
तामहप्रपितामहाः इदमासनं॰६ मातृपितामहीप्रपितामह्यः नांदीमुखाः
नांदी॰

यशगृहमागत्य। देशकालौसंकीर्त्य। अशेषदुःखनिवृत्तिनिरतिशयानं
दप्राप्तिपरमपुरुषार्थप्राप्तये करिष्यमाणपरमहंससन्यासस्वीकारा
र्थंतदंगत्वेनअष्टौश्राद्धानिसदैवानिसपिंडानिअन्नेनहविषासद्यः
करिष्ये इतिसंकल्प्य॥ सत्यवसुसंज्ञकाविश्वेदेवाः नांदीमुखाः स्थाने
•क्षणः कर्तव्यः॥ इत्येकंवृत्वा। तथैवद्वितीयंवृणुयात्॥ एवंसर्वत्र॥ प्र
थमेदेवश्राद्धे•। ब्रह्मविष्णुमहेश्वराः नांदीमुखाः स्थानेक्षणः कर्तव्यः
इतिप्रथमे। द्वितीये। ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रर्षयः नांदीमुखाः क
र्तव्यः। तृतीये देवश्राद्धे•। वसुरुद्रादित्याः नांदीमुखाः। कर्तव्यः ३ चतु
र्थेमनुष्यश्राद्धे सनकसनंदनसनातनाख्याः नांदीमु• कर्तव्यः ४ पंचमे
भूतश्राद्धे •पृथिव्यादीनिपंचमहाभूतानि एकादशकरणानि चक्षुरादीनि
चतुर्विधोभूतग्रामः नांदीमु• कर्तव्यः॥५ षष्ठेपितृश्राद्धेपितृपितामहप्र
पितामहाः नांदीमु• कर्तव्यः।६। सप्तमेमातृश्राद्धे •मातृपितामहिप्रपितामह
ह्याः नांदीमु• कर्तव्यः।७ अष्टमे आत्मश्राद्धे •आत्मपितृपितामहाः नांदीमु•

नो हीसुखादेवादयः प्रियंतामिति वदेत्। ततो विप्रा बलिदानवर्जं भुंजीयुः॥ तृप्ते
षु उपांशुनेणायता ॰ पंचाक्षरनमीति च श्रावयित्वा। संपन्नमिति पृष्टे सर्वे रुचित
मिति वदेयुः नेद मामाहो॥ तत आचांतेषु विप्रेषु तांबूलं दक्षिणां तेन द्राक्षामलकानि
श्रयद्रव्यं दातुमहमुत्सृजे इति संकल्पपूर्वकं दत्वा उपसंपन्नमिति ब्राह्मणान्पृष्ट्वा
अन्न। नदातार इति वरयाचनं। ब्राह्मणान्प्रदक्षिणीकृत्य प्रार्थयेत्। उत्थाय च ततो
विप्रान् हृष्टपुष्टेन चेतसा॥ प्रदक्षिणं ततः कृत्वा नमस्कृत्य द्विजोत्तमान्॥ क्षंतव्य
मिति तान्ब्रूयात्प्रणम्य शिरसा नतः॥ सत्यशाखार्थं मया श्राद्धं कृतमेतद् द्विजोत्तमाः॥ अ तृ
अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्याम्यहं गतीम्॥ गर्भजन्मजराभीतेः संतापत्र २
यतस्तथा॥ युष्मत्प्रसादादिच्छामि परं पदमनामयमिति प्रार्थ्य नमस्कृत्य कृतं कर्म
३ ईश्वरार्पणं कुर्यात्॥ यस्य स्मृत्येत्युक्त्वा॥ विष्णुस्मरणांते द्विराचामेदिति॥
इति नांदीश्राद्धवद्विधिस्तु नामगोत्रवर्जं प्रथमविभक्त्येव अष्टौ श्राद्धप्रयोगः॥ अथा
श्वलायनकर्तृके यजमाने। पार्वणविधिनाऽन्नेनामेन वा कार्य्यमिति विशेषः॥
~~ब्राह्मणान्प्रदक्षिणीकृत्य प्रार्थयेत्॥ उत्थाय च ततो विप्रान्~~ पूर्ववत्क्षणं दत्वा आस
नानि दत्वा ब्राह्मणाग्रे प्रागग्रदर्भोपरि। विश्वेदेवार्थमर्घ्यपात्रमेकं अष्टौ पार्वण

इदमासनं ७ आत्मपितृपितामहाः नांदीमुखा इदमासनं ८ इति सर्वत्रासनं दत्वा
पश्चात्सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः एष गंधः स्वाहा न मम ॥ १ ॥ ब्र
ह्मविष्णुमहेश्वराः नांदी० एष गंधः स्वाहा न मम २ देवर्षिब्रह्मर्षिक्षत्रर्षयः
नांदीमु० एष गंधः स्वाहा ३ वसुरुद्रादित्याः नांदी० एष० ४ सनकसनं
दनसनातनाः नांदी० ५ पृथिव्यादीनि पंचमहाभूतानि एकादशाच क्षुरा
दीनि करणानि चतुर्विधो भूतग्रामः नांदी० ५ पितृपितामहप्रपितामहाः
नांदी० एष गंधः स्वाहा न मम ६ मातृपितामहीप्रपितामह्यः नांदी० एष गं
धः स्वाहा० ७ आत्मपितृपितामहाः नां० एष गंधः स्वाहा० ८ गंधं दत्वा आपो द
द्यात् । एवं पुष्पधूपदीपाच्छादनानि दद्यात् । इदमाच्छादनं निष्क्रयद्रव्यं स्वाहा
न मम । ततो द्विजाग्रे भोजनपात्राणि निधायोपस्तीर्य । अन्नानि परि
विष्य । तदभावे आमं तन्निष्क्रयद्रव्यं वा निधाय गायत्र्याप्रोक्ष्य । सत्यवसु०
देवा इदमन्नं आमं निष्क्रयद्रव्यं वा यथाशक्ति सोपस्कर स्वाहा हव्यं न ममेति
सर्वत्र यथादैवतमन्नत्यागं कृत्वा । ततः प्रजापते न त्वदेता० इत्येणां ॥ अनेन २ नां

नां। दीमुखा इदं वो र्घ्यं स्वाहा न मम॥ विप्रहस्तात्प्रसृष्टः आपो नुमंत्रयते॥ या दिव्याः
आपः पयसा॰ भवंतु। आपो दत्वा १॥ एवं द्वितीये॥ देवर्षि ब्रह्मर्षि क्षत्रर्षयः नांदी
मुखाः इदं वोर्घ्यं स्वा॰ या दि॰ भवंतु॥ २॥ वसुरुद्रादित्याः नांदीमु॰ इदं॰ या॰ तु॰
३ सनकसनंदन सनातनाः नांदी॰ पा॰ तु॰ ४ पृथिव्यादीनि पंचमहाभूतानि एका
दशान सुरादीनि करणानि चतुर्विधो भूतग्रामः इदं॰ पा॰ तु॥ ५॥ पितृपिताम
हप्रपितामहाः नां॰ इ॰ इदं॰ ६॥ मातृपितामहिप्रपितामह्यः नां॰ इ॰ या॰ तु॥ ७॥
४ आत्मपितृपितामहाः नां॰ इ॰ या॰ तु॰ ८ सर्वत्रार्घ्यं दत्वा। तत्पात्रं न्युब्जीकृत्य॥ स ४
वीकरीत्या गंधाद्याच्छादनांते। भोजनपात्राण्यासाद्य॥ अग्नौ करणार्थं मन्नमा
दाय। घृताक्तं कृत्वा आमपक्षे तंदुलान्वा गृहीत्वा वदाने संपत्यावदाय॥ अ
ग्नये कव्यवाहनाय स्वाहा॥ सोमाय पितृमते स्वाहा॥ मंत्राभ्यां वैश्वदेविकौ विप्रो
विश्वेया वशिष्टषोडश ब्राह्मण करेषु हुत्वा॥ मधुरद्रव्याण्यन्नानि परि
विष्य आमपक्षे आमंतानि क्रपद्रव्यं वा अष्टादश ब्राह्मणपात्रेषु निधाय पृ
र्वीकरीत्या कृचितमिति वदेयुः॥ नेदमानाहोरत्यंतं कृत्वा आचांतेषु द्विजेषु दूर्वा

र्थमष्टमेवं। नवपात्राणि प्राक्संस्थानि विधाय। सर्वपात्रेषु द्विपत्रकं पवित्रं।। ओं हि॰ तेष्वप आ
सिच्य शन्नो देवीति सकृत् हनुमंत्र्य प्रथमे वैश्वदेवपात्रार्घ्ये। यवोसि धान्यराजो वा॰ सन्तु इति
यवानोप्य।। द्वितीयादिषु षट्सु। तिलोसि सोमदेवत्य इत्यनुमंत्रितपात्रं मंत्रमावर्तयन् यवानोप्य
गंधपुष्पाणि तूष्णीं दद्यात्। ऊहप्रकारस्तु। यवोसि सोमदेवत्यो गोसवे देवनिर्मितः
प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान्देवान्प्रीणयाहि नः स्वाहेति द्वितीये। नांदीमुखान्
ऋषीन्प्रीणयाहि नः स्वाहेति यवावापनं।। तृतीये नांदीमुखान् दिव्यान्प्रीणयाहि नः
स्वाहेति। चतुर्थे नांदीमुखान्मनुष्यान्प्रीणयाहि नः स्वाहा।। पंचमे नांदीमुखान्भि
भूतानि प्रीणयाहि नः स्वाहा।। षष्ठे नांदीमुखान्पितॄन्प्रीणयाहि नः स्वाहा।। एवं स
प्तमाष्टमयोर्यथास्थितपितृशब्दः।। ततः प्रतिमयुग्ममेकैकमर्घपात्रं स्वाहार्घ्य
इत्यावृत्या निवेद्य। सर्वत्रापो दत्वा। प्रथमदेवद्विजकरे अर्घ्यपात्रोपरिस्थपवि
त्रं निधाय।। पात्रांतरेणार्घ्यपात्रस्थजलमर्घं गृहीत्वा। या दिव्या आप इति मंत्रांते।।
सत्यवसुसंज्ञका॰ नांदी॰ इदमर्घं स्वाहा नमम इत्यर्घं दत्वा।। ततो वशिष्टमर्घपात्रस्थि
तमर्घजलं तद्द्वितीयदेवद्विजे पूर्ववद्दत्वा। एवमेवोत्तरत्र मर्घ्यपात्रं द्विधा विभज्य प्र
तिपार्वणमभिमंत्रित विप्रद्वये दद्यात्।। दानप्रकारस्तु।। ब्रह्मा विष्णु महेश्वराः

तामह्यः नां॰ अष्टमेरेखायां ॥ शुंधंतांआत्मनोनांदी॰ शुंधंतांपितरोनां॰ शुंधंतांपितामहाः
इतिसर्वत्रजलंनिनीयभक्ष्यैःकंदैर्वैरष्टाचत्वारिंशत्पिंडान्कृत्वा ४८ उक्तरेखासु
कृतजलसेकस्थले एकैकस्यैदेवतायै पिंडद्वयंदद्यात् ॥ प्रतिपिंडंमंत्रावृत्तिरि
तिनारायणवृत्तिकारः ॥ मंत्रांतरेतुद्वितीयस्तृप्तो इति ॥ पिंडदानमंत्रस्तु ॥
नांदीमुखाय ब्रह्मणे स्वाहा ॥ तदुत्तरतः सर्वतोवाद्वितीयः ॥ एवंसर्वत्र ॥ नांदी
मुखायविष्णवे स्वाहा ॥ नांदीमुखायमहेश्वराय स्वाहा ॥ नांदीमुखाय — द्वि
तीयरेखायां ॥ देवर्षिभ्योनांदीमुखेभ्यः स्वाहा २ ब्रह्मर्षिभ्योनांदीमुखेभ्यः॰ क्ष
त्रर्षिभ्योनां॰ २ तृतीयरेखायां वसुभ्योनां॰ हा ॥ रुद्रेभ्योनां॰ स्वाहा ॥ आदि
त्येभ्योनां॰ २ चतुर्थरेखायां ॥ सनकायनां॰ हा २ सनंदनायनां॰ हा २ सनातनायनां॰
हा २ पंचमरेखायां ॥ पृथिव्यादिपंचमहाभूतेभ्यो नां॰ स्वाहा २ एकादशचक्षुरादिक
रणेभ्योनां॰ स्वाहा २ चतुर्विधभूतग्रामाय नांदीमुखाय स्वाहा २ षष्ठमरेखायां
पित्रेनांदीमुखाय स्वाहा २ पितामहाय नांदीमुखाय स्वाहा २ प्रपितामहाय नां॰ २
सप्तमरेखायां मात्रे नांदीमुखायै स्वाहा २ पितामह्यै नां॰ प्रपितामह्यै नांदी॰ २

यवलाजारध्यैबदरीफलयुतं अन्नेन आमपक्षे सक्तुना वा पिंडदानं कुर्यात्॥ य
वा गोमयोपलिप्त भूमौ॥ अपहतेति मंत्रावृत्त्या दक्षिणारंभाः प्रागायता उदक्
संस्था अष्टरेखाः कृत्वा ताः अभ्युक्ष्य सर्वासु प्रागग्रान् कुशान् दूर्वा वा आस्तीर्य॥
तासु रेखासु॥ दक्षिणरेखामारभ्य प्रतिरेखां पिंडत्रयार्थं प्राक्संस्थं शुंधं
तां इत्यादिमंत्रैर्जलं सिंचेत्॥ मंत्राश्च॥ शुंधंतां ब्रह्मणो नांदीमुखाः शुंधंतां वि
ष्णवो नांदीमुखाः शुंधंतां महेश्वराः नां०॥ तदुत्तररेखायां॥ शुंधंतां देवर्षयः नां
दी० शुंधंतां ब्रह्मर्षयो नांदीमुखाः॥ शुंधंतां क्षत्रर्षयो नां० तृतीयरेखायां॥ शुंधं
तां वसवो नांदीमुखाः॥ शुंधंतां रुद्रा नांदीमु० शुंधंतामादित्या नांदीमु० चतुर्थरे
खायां॥ शुंधंतां सनका नांदी० शुंधंतां सनातना नां० शुंधंतां सनंदना नां० पं
चमरेखायां॥ शुंधंतां पृथिव्यादीनि पंचमहाभूतानि नांदीमुखानि॥ शुंधंतां एका
दशा चक्षुरादीनि करणानि नांदीमु० शुंधंतां चतुर्विधभूतग्रामः नांदीमुखः॥
षष्ठरेखायां॥ शुंधंतां पितरो नांदीमुखाः॥ शुंधंतां पितामहा नां० शुंधंतां प्रपिताम
हा नां० सप्तमरेखायां॥ शुंधंतां मातरो नां० शुंधंतां पितामह्यः नां० शुंधंतां प्रपि

चकेशवादिनाममंत्रैरभिषिच्य संस्थाप्य ॥ सम्यक्त्यर्थसारे ॥ दंडं जलपात्रं पवित्रं च
शिक्यं पात्रं कमंडलुं ॥ आसनं कौपीनमाच्छादनं कंथा पादुका दश इति ॥ १० ॥
यष्टिं जलपवित्रं च शिक्यं पात्रं । कमंडलुमिति पंच वा संस्थाप्योपविश्य ॥ उ
दगयनादौ एकादश्यां द्वादश्यां वा । आतुरश्चेत्कस्मिंश्चित्काले वा ॥ देशकालौ
स्मृत्वा ॥ परमहंसादिसन्न्यासग्रहणं करिष्ये इति संकल्प्य तदंगत्वेन विहितमा
दौ गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धानि करिष्य इति संकल्प्य
तानि कृत्वा ॥ आचम्य प्राणानायम्य ब्रह्मांजलिं विधाय मनसा जपेत् ॥
ॐ ब्रह्मणे नमः ॐ विष्णवे नमः ॐ रुद्राय नमः ॐ सूर्याय नमः ॐ सोमाय॰ ॐ
आत्मने नमः ॐ अंतरात्मने नमः ॐ परमात्मने नमः ॥ इत्युक्त्वाथ वेदादीन् जपेत् ६
अग्निमीळे ऋ॰ १ इषे त्वोर्जे त्वा य॰ १ अग्न आयाहि वीतये ऋ॰ १ शं नो
६ देवीरभिष्टये ऋ॰ ४ इति जपित्वा सक्तुमुष्टित्रयं प्रणवेन त्रिः प्राश्य ॥ आ
चम्य नाभौ करं दत्वा ऽभिमंत्रयेदेभिर्मंत्रैः ॥ ॐ आत्मने स्वाहा ॐ अंत
रात्मने स्वाहा ॐ परमात्मने स्वाहा ॐ प्रजापतये स्वाहा ॥ ततः पयो दधि घृत
माज्यमापो वा ॥ त्रिवृदसि प्रथमं प्राश्य ॥ प्रवृदसि द्वितीयं ॥ विवृदसि तृतीयं प्राश्य

अथ मे आत्मने नां॰ य स्वा॰ पित्रे नां॰ य स्वाहा २ पितामहाय नां॰ २ अत्र पितरो मादयध्वमि
त्याद्यनुमंत्रणादि सर्वं कृत्वा कृतं॥ पिंडान् गंधादिना संपूज्य नमस्कृत्य॥ उपसं
पन्नमिति विसृज्य। ब्राह्मणेभ्यः पूर्ववद्दक्षिणादानादि सर्वं कुर्यात्॥ एव
मष्टौ श्राद्धोत्तरं ब्रह्मराज्ञ्यानुरोधेन तस्मिन्दिने द्वितीये वा॥ शिखार्थं म
ङ्डि(?) पंचषड्वा केशान् संस्थापयित्वा॥ केशश्मश्रु कक्षोपस्थवर्ज्जं केशश्म
श्रुलोमादि वपनं विधाय नखानि निकृंत्य यथाविधि स्नात्वा कौपीनाच्छा
दनाद्युपयुक्तं स्वात्मने आचार्याय दक्षिणार्थं होमार्थं च द्रव्यं पृथक्कृत्वा
सति विभवे पुत्रदारादिभ्यो धनादि विभज्य॥ तदाज्ञया श्रितेभ्यः शेषं स
र्वमर्थिभ्यो दद्यात्॥ असति विभवे स्वात्मानमेव तेभ्यो निवेदयेत्॥ अथ दे
वागारे अग्न्यागारे नदीतीरे गोष्ठे अरण्ये वा शुचौ देशे स्वकौपीनादिकं वर्णके
त्वा॥ वेणवं सकृत्माषं ग्रंथियुक्तं योनिराहितं॥ अदग्धं। सत्वचं॥ शिरः प्र
माणं वा। ललाटांतं भ्रूप्रमाणं वा दंडं कमंडलुं च स्थूलं समं लोताटितं(?)॥ विप्रानी
तं समपर्वं ग्रंथियुक्तं समुद्धकं संपाद्य॥ शंखोदकेन १०८ प्रणवेन पुरुषसूक्तेन

वितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ॥ यामस्य कण्वो अदुह
त्प्रपीनां सहस्रधारां पयसा महीं गाम् ॥१॥ तत्सवितुरिति ऋ विश्वानि देव
सवितर्दुरितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥ एभिस्त्रिभिर्मंत्रैस्तिस्रः
समिधोऽभ्याधायाग्निं प्रज्वाल्य ॥ समित ७ संकल्पया ७ संप्रियो रोचिष्णूसु
मनस्यमानौ ॥ इषमूर्जमभिसंवसानौ ॥१॥ संवां मना ७ सि सं व्रता समुचि
त्तान्याकरम् ॥ अग्ने पुरीष्याधिपा भवत्वन्न इषमूर्जं यजमानाय धेहि ॥२॥
इति मंत्राभ्यामुपस्थाय ॥ यस्य स्मृत्येत्यादि एवमग्निं सिद्धं कृत्वा ततो ब्रह्मा ७
न्वाधानं ॥ अस्तमानात्पूर्वं प्राणानायम्य ॥ देशकालौ संकीर्त्य परमहंसस
न्यासं कर्तुं तत्र विहितं ब्रह्मान्वाधानं करिष्ये इति संकल्प्य अग्निमिंधना ७
याज्य संस्कारांते स्रुक्स्रुवौ संमृज्याग्निं परिषिच्य स्रुचि चतुर्गृहीतं गृ
हीत्वा ॥ ॐ स्वाहेति हुत्वा परमात्मन इदं ॥ उत्तरपरिषेचनं कृत्वा यस्य स्मृ
त्येत्यादि ॥ एतद्ब्रह्मान्वाधानं ॥ ततः संध्यावंदनपूर्वकमस्तमिते आदि
त्ये स्वाग्नौ नित्यहोमं वैश्वदेवं च कुर्यात् ॥ अथ सायं होमानंतरमुत्तरेणाग्निं

आपः पुनन्त्विति जलं प्राश्याचम्योपविश्य ततः ॥ उपवासं करिष्यामीति संक
ल्पयेत् ॥ ततः सावित्रीं प्रविशेत् ॥ ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं
ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि ॐ स्वः सावित्रीं प्रविशामि
धियो यो नः प्रचोदयात् ॥ ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि ॥ तत्सवितुर्वरे
ण्यमिति गायत्रीं जपित्वा किंचन प्राश्नीयात् ॥ अस्तमयात्प्रागेवोपासनाग्निं स
मिध्य विच्छिन्नं चेत्पुनः संधानमग्नित्यागप्रायश्चित्तहोमद्रव्यदानपूर्वकं कु
र्यात् ॥ अनाहिताग्निर्विधुरेण पृष्टोदिविविधाने नाग्निरुत्पादनीयः ॥ आचम्य
प्राणानायम्य देशकालौ संकीर्त्य ब्रह्मन्वाधानाद्यर्थं विधुरकल्पोक्तविधिना
विधुराग्निमुत्पादयिष्ये इति संकल्प्य ॥ स्थंडिले पंचभूसंस्कारान्कृत्वा ॥ अ
न्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ॥ अनु सूर्यस्य पुरुत्रा च
रश्मीननु द्यावापृथिवी आततंथ ॥ १ ॥ इत्यनेन श्रोत्रियागारादग्निमाहृत्य
॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ॥ वैश्वानरः सहसा
पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तं ॥ अनेन मंत्रेण प्रतिष्ठाप्य ॥ ता० स

र्भुवः स्वरित्यपः स्पृष्ट्वा । तरत्समंदी धावतीति सूक्तमप्सु जपेत् ॥ विप्रान्संभोज्य
कर्मणः पुण्याहं वाचयित्वा ॥ हेमरौप्ययुतकुशादिजलैः स्नात्वा देशकालौ सं
कीर्त्य संन्यासांगत्वेन विहितं प्राणादिहोमपूर्वकं पुरुषसूक्तहोमं तथा ज्ञा
नयोगसंपादनार्थं उपपातकादिसकलपापनिवृत्तिपूर्वकं स्वावयव
शुद्ध्यर्थं च विरजाहोमं च तंत्रेण करिष्ये इति संकल्प्य इध्माबर्हिषी संनह्य
च त्वारिंशद्देवताहोमपर्याप्तं तंडुलान् ॥ पत्न्यवहंतीत्यादि पार्वणवत् ॥ अ
८ ग्निमुखांते प्रधानहोमं कुर्यात् ॥ आश्वलायनयजमानेन्वाधानं कुर्यात् ॥ ८
चक्षुषी आज्येनेत्यंते प्राणादिपंचदेवताः समिच्चर्वाज्यैः प्रतिद्रव्यमेकैक
संख्याकाभिः ॥ नारायणं सहस्रशीर्षेति षोडशर्ग्भिः प्रत्यृचं तैरेवद्र
व्यैः प्रतिद्रव्यं एकैकसंख्याकाभिः पुनरत्र प्रधानं ॥ प्राणाद्येकोनविंशति
देवताः विरजामंत्रैः समिच्चर्वाज्याहुतिभिः प्रतिद्रव्यमेकैकसंख्याकाभिः
प्रजापतिमेकवारमाज्येन ॥ शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधा
नांते षष्ठ्युत्तरशतावरान् मुष्टीन् निरूप्य तथैव प्रोक्षणस्य अवघातादि ॥ श्रपयि

तृणान्यास्तीर्य तेषु दंडादीनि दत्त्वाय ष्टिदीपं चवाहू द्वादशा आसाद्य ॥
दक्षिणेनाग्निं कुशेषु कृष्णाजिनमास्तीर्य तस्मिन्नुपविश्य गायत्रीं जप
न् जागरणं कुर्यात् ॥ ततो ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातः सं
ध्यां प्रातर्होमं वैश्वदेवाह्निकं कृत्वा प्राणानायम्य व्याहृतीर्जपित्वा ॥ अग्न
ये स्थालीपाकं कुर्यात् ॥ तत्र प्रयोगः ॥ देशकालौ सं॰ परमहंससंन्यासं क
रिष्यमाणः कुर्वाणो वाहं तत्पूर्वांगत्वेन विहितमाग्नेयस्थालीपाकं करि
ष्ये इति संकल्प्य ॥ इध्माबर्हिषी स संनह्य पत्न्यवहंती ॥ चरुं श्रपयित्वेत्या
दि पार्वणस्थालीपाकवत् सर्वं कुर्यात् ॥ आश्वलायनेयजमानेन संकं कृत्वा ल्पं
॥ चत्वारि शृंगेत्यादि ध्यात्वा ॥ अन्वारब्धात् ॥ अस्मिन्नन्वाहित इत्यादि त्या
दिचक्षुषी आज्येनेत्यंतमुक्त्वा ॥ प्रधानदेवतमग्निं चरुद्रव्येणाज्ञोषेणेत्या
दि पूर्णपात्रनिधानांतं पवित्रे भूषे अग्नये त्वा जुष्टं निर्वपामीति चतुरो मुष्टी
न्निरुप्य तथैव प्रोक्ष्यत्या । घ्याज्यभागांते प्रधानहोमे ॥ अग्नये स्वाहेति हु
त्वा ॥ यदस्येति स्विष्टकृतं च हुत्वा शेषं स्थालीपाकवत्कुर्यादिति ॥ ततोऽग्र

त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यंतां० त्वगादि
भ्य इदं० २ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे०
स्वाहा शिरआदिभ्य० ३ उत्तिष्ठपुरुषहरितपिंगललोहिताक्षि देहि
देहि ददापयिता मे शुध्यंतां० पुरुषादिभ्य इ० ५ पृथिव्यापस्तेजोवायु
राकाशा मे शुध्यंतां० पृथिव्यादिभ्य इ० ६ शब्दस्पर्शरूपरसगंधा मे शु
ध्यं० स्वाहा० शब्दादिभ्य इ० ७ मनोवाक्कायकर्माणि मे शुध्यं० हा मन
आदिभ्य इ० ८ अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूया
सं स्वाहा ॥ अव्यक्तादिभ्य इदं० ९ आत्मा मे शु० हा आत्मन इदं० १ अंत
रात्मा मे० अंतरात्मन इ० ११ परमात्मा मे शु० हा परमात्मन इ० १२ क्षुधे
स्वाहा० क्षुध इ० १३ क्षुत्पिपासाय स्वाहा ॥ क्षुत्पिपासायेद० १४ विविट्यै
स्वाहा विविट्यायेइ० ॥१५॥ ऋग्विधानाय स्वा० ऋग्विधानायेदं० १६
कषोत्काय स्वाहा कषोत्कायेदं० १७ क्षुत्पिपासामलां ज्येष्ठाम् अलक्ष्मीं नाशा

त्वा आज्यभागौ तेप्रधाना हुतीर्जुहुयादितिविशेषः॥ ॐ प्राणायस्वाहा। प्राणा
येदं नमम॥ ॐ अपानाय॰ अपानायेदन्नमम॥ ॐ व्यानायस्वा॰ व्यानाये॰
ॐ उदानाय॰ उदाना॰ ॐ समानायस्वा॰ समानायेदन्नमम ५ सहस्रशी
र्षा॰ तं स्वा॰ नारायणायेदंनमम ॐ पुरुष एवेदं॰ तिस्वा॰ २ एतावान
स्य॰ दिवि स्वा॰ ३ त्रिपादूर्ध्व॰ अभिस्वाहा॰ तस्माद्विराल॰ पुरस्वा॰ ५
यत्पुरुषे॰ हविः स्वा॰ ६ तं यज्ञं ब॰ ये स्वाहा॰ ७ तस्माद्यज्ञात्सर्वहुतः
सं॰ श्च ये स्वाहा॰ ८ तस्माद्यज्ञात्सर्वहुत ऋचः॰ यत स्वाहा॰ ९ तस्मा
दश्वा अजायं॰ यः स्वाहा॰ १०॰ यत्पुरुषं॰ ते स्वाहा॰ ११॥ ब्राह्मणो॰ त स्वा॰
१२॥ चंद्रमाम॰ त स्वाहा॰ १३॥ नाभ्या आ॰ यन् स्वा॰ १४ सप्तास्या॰ पशुं स्वा॰
१५ यज्ञेन यज्ञ॰ देवाः स्वाहा॰ १६॥ प्राणापानव्यानोदानसमाना मे शुध्यंतां
ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ १७ प्राणादिप्यरदं॰ १ वाङ्मनः
श्चक्षुःश्रोत्रजिह्वाघ्राणरेतो बुध्याकूतिः संकल्पा मे शुद्धं २ वागादिप्यर॰

णींदत्वा।हसमाप्य।औपासनाग्नेरुपस्थानंकुर्यात्॥ॐसंमासिंचंतुमरु
तःसमिंद्रःसंबृहस्पतिः॥संमायमग्निःसिंचत्वायुषाचबलेनचा
युष्मंतंकरोतुमांइत्यग्निमुपस्थाय॥तस्मिन्नग्नौपात्रदाहंकृत्वा॥तेज
सानिगुरवेदत्वा॥आत्मसमारोपःकर्तव्यः॥अयंतेयोनिर्ऋत्वि
योयतोजातोअरोचथाः॥तंजानन्नग्नआसीदाथानोवर्धयागि
रः॥यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानं॥अच्छावसूनि
कृण्वन्नस्मेनर्यापुरूणियज्ञोभूत्वायज्ञमासीदस्वांयोनिंजातवेदोभु १०
१० वःआजायमानःसक्षयएहिइतिऋचायजुषाचत्रिरावर्तेत॥आत्म
न्यग्निंसमारोपयेत्॥अग्नेर्ज्वालांप्राश्नीयात्॥हस्तौप्रक्षाल्याचम्यॐ
एत्वयाग्नेसहेशप्रोऽशरीरमनुसंचरस्व॥नाहंत्वामपहायपरागां॥त्वांतं
मपहायपरागा॥इत्यग्निंविसृजेत्॥कृष्णाजिनमादाय॥उत्तरनारा
यणेनगृहान्निष्क्रमेत्॥ततःस्वेभ्यःपुत्रेभ्यआशिषंदत्वायात्॥

याम्यहं॥ अभूतिमसमृद्धिं च सर्वां निर्णुद मे पाप्मानं० स्वा० क्षुत्पिपासादि
भ्य इदं० १८ अन्नमय प्राणमय मनोमय विज्ञानमय मानन्दमय मात्मा मे
शुध्यंतां ज्योतिरहं० स्वा० अन्नमयादिभ्य इदं० १९ इति समित्र्वाज्यैः प्रति
मंत्रं चत्वारिंशदाहुतीर्हुत्वा अनेन मंत्रेण आज्यं हुनेत्। यदिष्टयच्चपूर्नं
यच्चापद्यनायदि॥ प्रजापतौ तन्मन सिजुहोमि विमुक्तोहं देवकिल्बिषा
त्स्वाहा॥ प्रजापतये इदं॥ ततः पुरुषसूक्तं जपेत्। वेदादीन् जपित्वा॥ ॐ
अग्निमीळे०॥ ॐ इषे त्वोर्जे त्वा०॥ ॐ अग्न आयाहि०॥ ॐ शन्नो देवीर०
वरोरेकदेवतः स्विष्टकृतं हुत्वा॥ समिधमिध्मसन्नहनं चाग्नौ प्रहृत्य
॥नजयाद्योदर्वीं परिधीन नक्ति पात्रप्रयुक्त दर्भा प्राणीत्यादि देवता सं
कीर्तने अग्निः सोमः अग्निः प्राणादि पंचदेवता पुरुषसूक्तदेवताः प्राणा
दिएकोनविंशति अग्निः स्विष्टकृत् त्रिरुद्रोत्यादि ब्रह्मविसर्जे
नात् प्राक्कृत्वा ब्रह्मणे हिरण्यमाज्यपात्रं मधुपूर्णं कांस्यपात्रं धेनुं
च दत्वा विसर्जयेत्॥ तत आचार्याय पूर्वोदिष्टं भागं धेनुं च वस्त्राणि स्कव

न्यासं करोमीति संकल्प्य अपांपूर्णांजलिं गृहीत्वा ॐ एषह्वा अग्निः सूर्यः प्राणं
गच्छ स्वाहा ॐ स्वां योनिं गच्छ स्वाहा ॐ आपो वैगच्छ स्वाहा ॥ इति मंत्रत्रये
ण जले ऽंजलित्रयं दद्यात् ॥ ततः पुत्रैषणा वित्तैषणा लोकैषणा सर्वैष
णा मया परित्यक्ता ॥ अभयं सर्वभूतेभ्यः स्वाहा इत्यपां पूर्णांजलिं जले
क्षिपेत् ॥ पश्चात्सर्वं ब्रह्मेति चिंतयेत् ॥ नान्यत् पुनरभयं दत्वा ब्रह्मांज
लिं कृत्वा पठेत् ॥ यत्किंचिद्बंधकं कर्म कृतमज्ञानतो मया ॥ प्रमादालस्य
दोषोत्थं तत्सर्वं संत्यजाम्यहं ॥ त्यक्त सर्व विमुक्तात्मा गतस्नेहः शुभाशुभः
॥ कामभोगादिकं सर्वं त्यक्तं चैवमुदाहरेत् ॥ एवं त्यक्ष्याम्यहं सर्वं काम
११ भोगं सुखादिकं ॥ शोकं तोषं विवादं च गंधमाल्यानुलेपनं ॥ भूषणं नर्तनं गेय १ १
ं दानमादानमेव च ॥ नमस्कारं जपं होमं याश्च नित्या क्रिया मम ॥ नित्यां नै
मित्तिकं काम्यं वर्णधर्माश्रमाश्रयं ॥ सुप्तधर्माश्रये केचित् शुभाशुभफला
नि च ॥ करणं कार्य कर्तृत्वं कर्तारं करणैः सह ॥ सर्वमेव परित्यज्य ध्याति ष्ठ
ति मानमः ॥ आत्मानं सर्वभूतस्थं सर्वभूतानि चात्मनि ॥ चतुर्विधस्य सन्न्या

तसर्वे भवंतु वेदाढ्याः सर्वे भवंतु सोमपाः ॥ सर्वे पुत्रमुखं दृष्ट्वा सर्वे भ
वंतु भिक्षुकाः ॥१॥ पश्चाद्योग्यंपुत्रं प्रतिकथयति ॥ त्वं ब्रह्म त्वं यज्ञ स्त्वं
लोक स्त्वं सर्वमिति ब्रूयात ॥ सपुत्रः पितरं प्राह ॥ अहं ब्रह्माहं यज्ञोहं
लोकोहं सर्वमिति ॥ यद्यपुत्रः अहं ब्रह्माहं यज्ञोहं सर्वमिति स्वयमे
वजपेत् ॥ शिवं स्वस्त्यस्तु सर्वेभ्यः ॥ तथा बद्ध्वा पाशैरिशाष्टे ॥ अ
थ पुत्रान स्कन्धे बंधून्प्रत्याह ॥ न मे कश्चिन्नाहं कस्यचित् ॥ इति
अथ बंधविसर्जनं ॥ शृण्वंतु सर्वे श्रीगुरुप्रसादात् संसारस्य पारं ग
तुकामोस्मि ॥ मया सर्वेषां ममता त्यक्ता पुत्रेषणा वित्तेषणा लोकेष
णा त्यक्ता युष्माभिर्ममोपरि ममता न कर्तव्या ॥ विघ्नो न विधेयः ॥
ततो जलाशयं गत्वा ॥ अंजलिना जलमाहाय अप्रतिरथेनाप्सुः
क्षिप्त्वा नो इति सूक्तेनाभिमंत्र्य ॐ सर्वाभ्यो देवताभ्यः स्वाहा इति त्य
जेत् ॥ तिथ्यादिस्मरणपूर्वकं स्नानं विधाय अपरो ब्रह्माण्यायेस

एतान्नेषान्भुवनभुङ्दोदिशश्चैवावलोकयन्॥प्रार्थयेत्॥आदित्यचंद्रावनलोनिल
श्चद्यौर्भूमिरापोहृदयंनयमश्च॥अहश्चरात्रिश्चउभेचसंध्येधर्मोहिजानातिन
रस्यवृत्तं॥आदित्यचंद्रादीन्सर्वान्देवानकर्मसाक्षिणोनिखिलान्गुर्वादीन्ब्रा
ह्मणान्सन्यासंसाक्षित्वेनध्यायेत्॥ततोनाभिप्रमाणंजलंप्रविश्यप्राङ्मुखःस
न्गायत्रींप्रविशामि।इतिसंकल्प्य॥ॐभूःसावित्रींप्र०तत्सवितुर्वरेण्यंॐ
भुवःसावित्रींप्र०भर्गोदेवस्यधीमहिॐस्वःसावित्रींप्रविशामिधियोयोनःप्र
चोदयात्॥ॐभूर्भुवःस्वःसावित्रींप्र०सर्वांगायत्रींजपेत्॥ॐपरोरजसेसा
वदोमितिजपित्वाचस्वप्रणवमयमात्मानंध्यात्वाजलेस्थितःॐतरत्समंदीधा
वतीतिचतुर्ऋचंजपित्वा।आदित्यमुपतिष्ठते॥पुत्रैषणायाश्चवित्तैषणायाश्च
लोकेषणायाश्चव्युत्थिताहंभिक्षाचर्यंचरामीत्युक्त्वापाणिनाअप्सुअपोहुत्वा॥त्रै १२
१२ धोच्चारंकुर्यात्॥तदुक्तंब्रह्मचर्येपरिशि[illegible]ष्टे॥ॐभूःसन्यस्तंमया॥ॐभुवःसन्न्य
स्तंमया।ॐसंन्यस्तंमया॥इतित्रिर्मंत्रंमध्यमोच्चस्वरेणोक्त्वा।ॐअभयंस
र्वभूतेभ्योमत्तःस्वाहेतिप्राच्यांदिशिअपांपूर्णांजलिंक्षिपेत्॥ततस्तच्छीशिखार्थंस्था
पितकेशान्उत्साद्य॥यज्ञोपवीतमप्युधृत्यहस्तेगृहीत्वा॥वेदांतविज्ञानसुनिश्चितार्थाः

त्याभूतग्रामस्यनिस्पृहः ॥ कृतं नैवेप्सितं चैव वांछितं चानुमोदितं ॥ संचिंत्य सर्व
भूतेभ्यो दद्यादभयदक्षिणां ॥ पञ्चाकराभ्यां विहरन्नाहं वा कायमानसैः
॥ करिष्ये प्राणिनां पीडां प्राणिनः संतु निर्भयाः ॥ देहे जले वसेत्कूर्मो स्थावरा
जंगमाश्रये ॥ पाषाणसंपुटे येषै श्लेष्म विश्लेषकाश्रये ॥ लोमवस्त्रादि
धान्येषु शयनेष्वासनेषु च ॥ ते स्वयं सुखिनः संतु तुष्टस्ततो मद्दयं विना ॥ इते
वं सर्वभूतेभ्यः सर्वत्राभयदक्षिणां ॥ करुणो मैत्रवृत्तिश्च प्रज्ञाह उंछसं
स्थितः ॥ ततो विचिंतयेद्धीमान् सर्वमात्मनि संस्थितं ॥ कोऽस्ति मे कश्च मे ना
स्ति शुद्ध एकोहमच्युतः ॥ संसारादित्यतमोतिविष्णुरो देहमानसैः ॥ ब्र
ह्मज्ञानां ब्रुवीतेन सिंचमां वाक्यवारिणा ॥ न मेस्ति बांधवः कश्चिन्मुक्त्वात्मा
नं परावरं ॥ ममात्मैव परो बंधुरूर्ध्वाधः पृष्ठतोग्रतः ॥ इंद्रियैर्विषयैः सर्वैम
ध्यायंतर्बहिः स्थितः ॥ विश्वेभ्वरो महात्मा वै सर्वज्ञः सर्वतोमुखः ॥ त्यक्त्वैर
भयं दत्वा सर्वं समजमीश्वरं ॥ व्यक्ताव्यक्तं परं शुद्धं सत्यं निश्चित्यतत्वतः ॥

याचम्य दंडप्रार्थनां कुर्यात्॥ ॐ वार्क्षे त्वं घ्नः शर्म मे भव यत्पापं तन्निवारय॥ विष्णुह
स्ते यथा चक्रं शूलं शिवकरे यथा॥ इंद्रहस्ते यथा वज्रं तथा दंड भवाय मे॥
इति दंडं संप्रार्थ्य ॐ इंद्रस्य वज्रोसि सखा मा गोपाय इत्यनेन मंत्रेण दंडग्र
हणं कुर्यात्॥ प्रणवेन कमंडलुं गृहीत्वा ततो यावद्गुरुसमीपे गमनं॥ ताव
द्विष्णुस्मरणपरो भवेत्॥ ततो दंडकमंडलुवस्त्रयुक्तः समित्पाणिः गुरु
समीपं गत्वा। नमस्कारं विधाय। गुरुआसने नोपविश्य। करसंपुटं कृत्वा
गुरुप्रार्थनां कुर्यात्॥ श्रीगुरो भगवान्यस्मात् घोरात्समुद्धर॥ असकृज्ज
न्मजरामरणाद्यपारसंसाराद्दारुणान्नमां तारय॥ अतो नामभयं हत्वा यु
ष्मच्छरणमागतः॥ त्राहि मां योगिनामीश नान्यस्त्राता स्ति मे प्रभो॥ विस्प
हः सर्वतः शांतः सर्वविद्याविशारदः॥ सर्वसंशयसंछेत्तानलसो गुरुरा
उच्यं॥ त्रायस्व भो जगन्नाथ गुरो संसारवह्निना॥ दग्धं मां कालदष्टं च त्वा
महं शरणं गतः॥ अद्यप्रभृति भूतानि न हिंस्यामि कदाचन॥ महाव्रतं चरि
ष्यामि कर्मणा मनसा गिरा॥ अविद्याकृष्णसर्पेण दष्टं तद्विषपीडितं॥ त्वद्वाक्या

सन्यासयोगाद्यतयः शुद्धसत्वाः॥ ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे
इति मंत्रेण सर्वमेकीकृत्य केशान्यज्ञोपवीतं प्रक्षाल्य ॐ आपो वै सर्वा देवताः सर्वा
भ्यो देवताभ्यो जुहोमि स्वाहा॥ ॐ भूः स्वाहा इत्यप्सु जलैः सह जुहुयात्॥ ततो वि
ष्णुं प्रार्थनाप्रकारमाह यमः॥ दत्वा तोयांजलिं विप्रो भक्त्या संप्रार्थयेद्धरिं॥ सर्व
देवात्मके तोये तोया इति मह्यं करे॥ दत्वा सर्वैषणां त्यक्त्वा युष्मच्छरणमागतः
त्राहि मां सर्वलोकेश गतिरन्या न विद्यते॥ सन्यस्तोऽहं जगन्नाथ पाहि
मां मधुसूदन॥ त्राहि मां सर्वलोकेश वासुदेव सनातन॥ सन्यस्तोऽहं जगद्यो
ने पुंडरीकाक्ष मोक्षद॥ अहं सर्वाभयं दत्वा भूतानां परमेश्वर॥ युष्मच्छरणमा
पन्नस्त्राहि मां पुरुषोत्तम॥ ततो जलांते उदङ्मुखः सन्॥ वस्त्रं त्यक्त्वा यथाजा
तरूपधरो दिगंबरो भूत्वा॥ बहिर्भूमावुदङ्मुखः पंच वा सप्त वा पदानि गच्छेत्॥ जि
ज्ञासुं प्रति आचार्यो दंडवत्प्रणिपत्य॥ अतिप्रियं वचनैर्लौकिकव्यवहारार्थं
लज्जानिवारणार्थं वासोयुग्मं लोकोपकारधर्मशिक्षायै लांगोसर्पनिवारणार्थं
दंडयुक्तं च करोमि इति कुर्यात्॥ ततः स्वयं कौपीनं काषायवासः स्वीकृत्य॥ परिधा